**दिनाङ्क:- 14.05.2024**
**प्रात:- 06:55**

**अथ वार्ता:**

**मतदानप्रतिशतम्**

ह्यः लोकसभानिर्वाचनस्य चतुर्थे चरणे सायं पञ्चचत्वारिंशत् निमेषाधिक एकादश वादन पर्यन्तं प्रायः सप्तषष्ठी दशमलव पञ्चविंशतिः प्रतिशतं मतदानम् अभवत्। अस्मिन् चरणे नवराज्याणां एकस्य केन्द्रशासित प्रदेशस्य च षण्णवतिः लोकसभासनानां कृते मतदानं जातम् । रात्रौ पञ्चचत्वारिंशत् निमेषाधिक एकादश वादनपर्यन्तं आन्ध्रप्रदेशे सार्ध सप्ततिः प्रतिशतं, बिहारे सप्तपञ्चाशत् दशमलव षड् प्रतिशतं, तेलङ्गानायां चतुःषष्ठी दशमलव चतुःसप्ततिः प्रतिशतं मतदानम् अभवत्, जम्मू-कश्मीरे सप्तत्रिंशत् दशमलव अष्टनवति प्रतिशतं, झारखण्डे पञ्चषष्ठिः दशमलव द्विप्रतिशतं, मध्यप्रदेशे सप्ततिः दशमलव अष्टनवति प्रतिशतं, महाराष्ट्रे एकोनषष्ठिः दशमलव चतुःषष्ठी प्रतिशतं, ओडिशायां त्रिसप्ततिः दशमलव सप्तनवतिः प्रतिशतं, उत्तरप्रदेशे अष्टपञ्चाशत् दशमलव पञ्च प्रतिशतं, पश्चिमबङ्गे अष्टसप्ततिः दशमलव सप्तत्रिंशत् प्रतिशतं च मतदानानि समनुष्ठितानि। आन्ध्र-प्रदेशस्य पञ्चविंशति: तेलंगानाया: सप्तदश उत्तरप्रदेशस्य त्रयोदश महाराष्ट्रस्य एकादश मध्यप्रदेश-पश्चिम-बंगालयो: प्रत्येकम् अष्ट बिहारस्य पञ्च झारखण्ड-ओडिशा-राज्ययो: प्रत्येकं चत्वारि सहैव जम्मू-कश्मीरस्य एकस्य आसनस्य च कृते मतदानानि जातानि।

निर्वाचनआयोगेन उक्तं यत् मतदानप्रक्रिया शान्तिपूर्णरीत्या सम्पन्नं जातम्। श्रीनगरसंसदीयक्षेत्रे सप्तत्रिंशत् दशमलव अष्टनवति: प्रतिशतं मतदानं जातम् यत् दशकेषु सर्वाधिकम् अस्ति। चदूरा, चाह-ए-शरीफ, गन्देरबल, कङ्गन, खानसाहिब, शोपियां विधानसभाक्षेत्रषु पंचचत्वारिंशत् प्रतिशतात् अधिकं मतदानं कृतम्। बडगाम, गन्देरबल, पुलवामा, शोपियां च क्षेत्रेषु पूर्णतया शान्तिपूर्णं उच्चमतदानं च जातम्। आयोगेन उक्तं यत् एकस्मिन् दुर्भाग्यपूर्णे घटनायां तेलङ्गाना-राज्यस्य चम्पेट्-नगरस्य एकस्य मतदान-अधिकारिण: कर्तव्यकाले एव निधनम् अभवत्।

**लोकसभा-नैर्वाचनिकसभा**

लोकसभा-निर्वाचनस्य शेषेभ्य: त्रिभ्य: चरणेभ्य: प्रचाराभियानं शीर्षस्थानं भजते। विभिन्न-दलानां वरिष्ठनेतृणाम् जनसभा: मार्गीय प्रदर्शनानि च भविष्यन्ति। प्रधानमन्त्री भाजपादलस्य वरिष्ठनेता च नरेन्द्रमोदी ह्य: बिहार-राज्ये अनेकानि पथ प्रदर्शनानि कृतवान्। असौ ह्य: प्रात: हाजीपुर, मुजफ्फरपुर क्षेत्रयो: जनसभा: संबोधितवान्। सायंकाले प्रधानमन्त्री श्रीमोदी उत्तरप्रदेशस्य वाराणसीनगरे एकं मार्गीयप्रदर्शनं विहितवान् । तदनन्तरं प्रधानमन्त्री अद्य वाराणसी लोकसभाक्षेत्राय स्वीय नामांकन पत्रं प्रपूरयिष्यति। कांग्रेस दलस्य वरिष्ठ नेता राहुलगांधी उत्तरप्रदेशस्य रायबरेली जनपदे एकां जनसभां सम्बोधितवान्। असौ आश्वासितवान् यत् कांग्रेस इंडी संयुतिदलं यदि प्रशासने आयास्यति तर्हि अस्य प्रथमं दायित्वं भविष्यति निर्धनकृषकाणां कर-मुक्ति-प्रदानं इति।

**सोनोवाल-ईरानदेश:**

केन्द्रीय-जलपोत-जलमार्ग-मन्त्री सर्बानन्द सोनावाल: ह्य: ईरानदेशाय समप्राप्तवान् । सूत्रानुसारि मन्त्री भारत-ईरान-देशयोर्मध्ये दीर्घकालिक महत्वपूर्ण-चांबहार-जलपोलस्थानक-सहभागित्वपत्रे एकस्मिन् हस्ताक्षरं कृतवान्। एतत् सहभागित्व पत्रं पाकिस्तानस्य कराचीस्थितं ग्वादर-जलपोत-स्थानकं वारयित्वा ईरानदेशस्य माध्यमेन दक्षिणमध्य-एशिययो: मध्ये नव-व्यापारमार्गस्य द्वाराणि उद्घाटयिष्यति। श्रीसोनोवालस्य यात्रेयं लोकसभानिर्वाचनावधौ चाबहार-जलपोत स्थानकाय प्रदत्तमहत्वे बलं प्रददाति।

**।। इति वार्ता: ।।**